International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 05-09
© 2024 IJSR
www.anantaajournal.com
Received: 05-12-2023
Accepted: 09-01-2024

**अभिजित् देबशर्मा**
शोधच्छात्र, संस्कृत प्राच्यविद्याध्ययन संस्थानम्, जवाहर लाल नेहरू विश्वविद्यालयः नवदेहली, भारत

**Corresponding Author:**
**अभिजित् देबशर्मा**
शोधच्छात्र, संस्कृत प्राच्यविद्याध्ययन संस्थानम्, जवाहर लाल नेहरू विश्वविद्यालयः नवदेहली, भारत

# धर्मशास्त्रीयसमाजव्यवस्थायाम् आपद्धर्मः

## अभिजित् देबशर्मा

**सारांश:**
भारतीयसंस्कृतेः प्रमुखवैशिष्ट्यानि यथा- प्राचीनत्वम्, आध्यात्मिकत्वं, समन्वयशीलत्वं, बहुदेवोपासना, धर्मकर्मप्राधान्यञ्चादयः। एतेषु प्रमुखैको धर्मः। सामान्यतोऽद्यत्वे जनाः नाना सम्प्रदायमेव धर्मरूपेण स्वीकुर्वन्ति। धर्मः समस्तमानवजीवनपद्धतेः नियन्त्रकः कर्तव्याकर्तव्यादिनिरूपकश्च वर्तते। प्रवृत्तिनिवृत्तिप्रतिपादकः धर्मोऽयं यस्य आधारः सर्वप्राचीनग्रन्थाः वेदाः सन्ति। अत उक्तम्- वेदोऽखिलो धर्ममूलम्।[1] धर्मस्य स्वरूपं मुख्यतः त्रिविधम्- सामान्यधर्मः विशिष्टधर्मः आपद्धर्मश्च। एतेषु आपद्धर्म सैव व्यवहारः य आपत्तिकाले वर्जिते सत्यपि विवशतया कर्तव्यो भवति। धर्मशास्त्रीयग्रन्थानाम् आलोके आपद्धर्मस्य विषये शोधपत्रेऽस्मिन् समासतः विवेच्यते। पत्रमिदं सर्वेभ्यः पाठकेभ्यः लाभप्रदं भविष्यतीति आशयः।

**कूटशब्द :** आपद्धर्मः, धर्मः, महाभारतम्, मनुः, मनुस्मृतिः, विशिष्टधर्मः, याज्ञवल्क्यश्च।

**प्रस्तावना**

धर्मशब्दः धृञ् धारणे धातुना सह मनिन्प्रत्ययसंयोगे निष्पद्यते। यस्य सामान्यार्थः- धरतीति धर्मः अर्थात् यः धारयति येन विश्वमिदं धृतं रक्षितं स धर्मः। धर्मस्य व्युत्पत्तित्रयं वर्तते १. ध्रियते लोकः अनेन इति धर्मः २. धरति धारयति वा लोकं इति धर्मः ३. ध्रियते लोकयात्रानिर्वाहार्थमिति वा धर्मः। वेदविहितकर्म-आचार-नीति-पुण्य-स्वभाव-यम-यागादिषु अर्थेषु धर्मपदमिदं प्रयुज्यते। यः धारयति तथा येन विश्वमिदं धृतं रक्षितं वा स धर्मः। एतदर्थं महाभारते व्यासाचार्य आह-

धारणाद्धर्म इत्याहुः धर्मः धारयते प्रजाः।[2]

वेदार्थो धर्मः इति भगवता जैमिनिनापि प्रतिपादितं यत्-

चोदनालक्षणोऽर्थो धर्मः इति ।[3]

जगत्यस्मिन् एकमेव वस्तु यत्मरणानन्तरं सर्वैः सह अनुयाति स धर्मः, अन्यत्सर्वं शरीरनाशेन सह विनश्यते। एवं धर्मस्योपादेयम् नितरां प्रतिपाद्यते-

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वं अन्यद्धि गच्छति॥[4]

किन्तु धर्मस्य त्यागः कथंचिदपि परिस्थितौ न करणीयः इति महाभारते उक्तं यथा-

न जातु कामान्न भयान्न लोभाद्, धर्मं त्यजेज्जीवितस्यापि हेतोः।[5]

स्वधर्मस्य कृते प्राणत्यागे अपि कदापि संकोचः न विधेयः इति गीतायामाह-

स्वधर्मे निधनं श्रेयः ... ।[6]

एवं जनैः प्रातः शय्यात्यागात् रात्रौ शयनपर्यन्तं यत्किमपि स्वजीविकानिर्वाहनाय क्रियते सर्वं धर्मना कार्यमिति भावः।
महाभारते सामान्यतया धर्मस्य भेदत्रयं विवृतम्- वेदोक्तधर्मः स्मृतिशास्त्रधर्मः शिष्टागमधर्मश्च। यथा-

वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतोऽपरः।
शिष्टागमोऽपरः प्रोक्तस्त्रयो धर्माः सनातनाः॥[7]

पुनः स्मृतिधर्मस्य षड्भेदाः सन्ति यथा- वर्णधर्मः आश्रमधर्मः वर्णाश्रमधर्मः गुणधर्मः निमित्तधर्मः साधारणधर्मश्च। अपरत्र धर्मस्य स्वरूपं मुख्यतः त्रिविधम् यथा- सामान्यधर्मः विशिष्टधर्मः आपद्धर्मश्च। त्रिविधधर्मानां समासतः विवरणं निम्नलिखितम्-

**सामान्यधर्मः-** धर्मेऽस्मिन् नैतिकनियमाः अन्तर्भवन्ति। अयं मानवधर्मनाम्नापि प्रसिद्धः। सामान्यधर्मपालनेन जनेषु सततं सद्गुणानां विकासः सर्वेषां च कल्याणं भवति। मन्वाचार्येण धर्मस्य दशलक्षणाः प्रतिपादिताः यथा-

धृतिः क्षमा दमोऽस्तेयंशौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥[8]

एते सर्वे सामान्यधर्मा वर्तन्ते येषां पालनं सर्वासु स्थितिषु अवश्यमेव सर्वैः करणीयम्। एवं निष्कर्ष्यते यत् व्यक्तेः शारीरिक-नैतिक-आत्मिक-आध्यात्मिकविकासाय सामान्यधर्माः सर्वैः पालनीयाः।

**विशिष्टधर्मः-** धर्मेऽस्मिन् तानि कर्तव्याणि अन्तर्भवन्ति यानि जनेभ्यः काल-स्थान-परिस्थित्यनुसारम् आवश्यकानि भवन्ति। अयं स्वधर्मनाम्नापि ज्ञायते। मानवः स्वधर्मपालयन् साक्षात् ब्रह्म संपूज्य सिद्धिं प्राप्नोतीति विशिष्टधर्मस्य महत्वं गीतायामाह-

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।[9]

स्वधर्मं पालयन्नेव पुरुषः मोक्षाधिकारी भवति। विशिष्टधर्मस्य अपि नाना प्रकाराः यथा- राजधर्मः स्त्रीधर्मः वर्णधर्मः आश्रमधर्मः वर्णाश्रमधर्मः कुलधर्मः युगधर्मश्च।

**आपद्धर्मः-** आपद्धर्म इत्युक्ते संकटकाले यो धर्मः विधीयते उत वा विशेषपरिस्थितिषु धारणीयः धर्मः। आपद्धर्मोऽयं सामान्यतः अधर्मरूपेण भवति किन्तु विपत्तिकाले अधर्ममिदं धर्मरूपेण परिवर्तयति। मानवजीवनेऽकस्मादागतासु
विपत्तिकष्टरोगसंकटशोकादिषु नानापरिस्थितिषु मानवः सामान्य-विशिष्टधर्मौ विहाय अधर्मं धर्मरूपेण पालयति असौ आपद्धर्म कथ्यते। यथा महाभारते भणितम्-

यस्मिन्यथा वर्तते यो मनुष्यस्तस्मिंस्तथा वर्तितव्यं स धर्मः।
मायाचारो मायया वर्तितव्यं साध्वाचारः साधुना प्रत्युपेयः॥[10]

अर्थात् यः यथा व्यवहरेत् तेन सह तथैव व्यवहारो धर्मः। मायाचारेण सह मायया वर्त्तितव्यं तथा साध्वाचारः साधुना वर्तितव्यः। धर्मसंकटनिवारणाय संकटकाले पालनीयः आपद्धर्मोऽयम्।
शोधपत्रस्य विषयदृष्ट्या आपद्धर्मस्य विषये यथाकिञ्चिदुपस्थाप्यते यथामतिः। आपद्धर्मस्य विषये धर्मशास्त्रीयग्रन्थेषु स्थले स्थले विवेचनमुपलभ्यते। यथा याज्ञवल्क्यस्मृतेः प्रायश्चित्ताध्याये आपद्धर्मनाम प्रकरणमेकं यस्मिन् स्पष्टं विवृणोति

क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः।
निस्तीर्य तामथात्मानं पावयित्वा न्यसेत्पथि॥[11]

अर्थात् द्विजः यदि स्ववृत्या जीवितुमसमर्थः क्षत्रसम्बन्धिना कर्मणा शस्त्रग्रहणादिना आपदि जीवेत्। तेनापि जीवितुमशक्नुवन् वैश्यसम्बन्धिना कर्मणा वाणिज्यादिना जीवेत्, न तु शूद्रवृत्या। मन्वाचार्यस्यापि एतदेव मतम्।[12] यदि आवश्यकाः पाकयज्ञादिधर्माः स्वसाधनव्रीह्यादिधान्याभावेन न निष्पद्यन्ते तर्हि धान्येन तिलाः विक्रेयं नेयाः तथापत्तिकाले कस्माच्चित् दानमन्नं च गृह्णाति चेदपि ब्राह्मणस्य पापः नैव यतो हि असौ अग्निसूर्यवत् भवति।[13] याज्ञवल्क्याचार्येण आपत्काले जीवनस्य साधनानि अपि उल्लेख्यन्ते-

कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः।
सेवानूपं नृपो भैक्षमापत्तौ जीवनानि तु॥[14]

क्षुत्पीडापदि पुरुषेण कर्तव्यमाह धान्याभावेन त्रिरात्रं बुभुक्षितोऽनश्नन् स्थित्वा अब्राह्मणाच्छुद्रात्तदभावे वैश्याद् तदभावे क्षत्रियाद्वा हीनकर्मकाद्वा दिनमेकनिर्वाहयोग्यं धान्यं हरेत्। यथा मनुः आह -

तथैव सप्तमे भक्ते भक्तानि षडनश्नता।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः॥[15]

यदि नृपेण सामर्थ्यानुसारं प्रजानां सुरक्षां कुर्वदापत्काले अष्टमभागस्य स्थाने चतुर्थभागमपि संग्रहीतुं क्रियेत चेदपि पापलिप्तो न भवति। तथा राजा राज्ये प्रजानाम् आचार-कुल-शील-शास्त्रज्ञान-वेदाध्ययन-तप-कुटुम्बज्ञानानि च सम्यक् प्राप्य योग्यानां कृते धर्मसम्मतवृत्तीन् प्रदद्यादिति।[16]
महाभारतस्य शान्तिपर्वणि आपद्धर्मनाम्ना एकत्रिंशदधिकशततमम् उपपर्व एकं यत्र भरतनन्दनभीष्मेण यधिष्ठिराय उपदिश्यते यदि बाह्याक्रमणकारी राजा धर्मार्थपरायणः आचारविचारशुद्धर्वा स्यात्तु तेन सह सन्धिः शीघ्रं कार्यः-

बाह्यश्चेद् विजिगीषुः स्याद् धर्मार्थकुशलः शुचिः।
जवेन सन्धिं कुर्वीत पूर्वभुक्तान् विमोचयेत्॥[17]

यदि शत्रुः अधर्मपरायणः बलवान् च भवति तथापि राज्यरक्षाय तेन सहापि सन्धिकार्यम्। पुनरपि शान्तिपर्वणि युधिष्ठिरः पृच्छति यत् केनचित् बहिष्ठात् दुर्गोपरि आक्रम्यते, राज्यान्ते मन्त्रिणः कुपिताः स्युः, राज्ञः गुप्तरहस्योद्घाटनं जातं चेत् किं कर्तव्यमिति स्थितौ भीष्मः आह- राजा शीघ्रं सन्धिकार्यं सम्पाद्येत उत वा तेन पराक्रमेण शत्रूपरि आक्रम्येत यत्र मृत्युरपि मङ्गलकारि। यथोक्तम्-

क्षिप्रं वा सन्धिकामः स्यात् क्षिप्रं वा तीक्ष्णविक्रमः।
तदापनयनं क्षिप्रमेतावत् साम्परायिकम्॥[18]

आपद्धर्मस्य विषये एकान्यकथा छान्दोग्योपनिषदि प्राप्यते या उषस्तिकथानाम्ना विख्याता। यथा- कदाचित् कुरुदेशे तुषारवर्षणात् सर्वाणि सस्यानि नष्टानि यस्मात् उषस्तिचाक्रायणऋषेः ग्रामे अकालः आपतितः। दिनद्वयपर्यन्तं ऋषिणा किमपि खादनाय न प्राप्तम्। असौ अपरग्रामं प्रति अगच्छत् तत्रापि तादृशी परिस्थितिः। आशाहीने सति ऋषिरयं इतोऽपि अग्रेऽगच्छत्। अकस्मात् तेन हस्तिपकैकः वृक्षस्याधः स्थित्वा फलं खादतीति दृष्टम्। उषस्तिः तस्य पार्श्वे गतः तथा पृष्टवान् भोः किं खादन्नस्ति? तेन उत्तरितं- कुल्माषं खादामि। उषस्तिचाक्रायणेन भणितं- मह्यमपि कृपया किञ्चित् देहि, दिनद्वयपर्यन्तं बुभुक्षितोऽस्मि। व्यक्तिनोक्तमवश्यं ददामि किन्तु एतत्सर्वम् उच्छिष्टं संजातमस्ति-

एतेषां मे देहीति होवाच। तानस्मै प्रददौ।
हन्तानुपानमिति उच्छिष्टं वै मे पीतस्यादिति होवाच॥[19]

ततः साक्षात् उषस्तिराह- भवतु नाम उच्छिष्टं तथापि मह्यं देहि। हस्तिपकेन पत्रे किञ्चित् कुल्माषः दत्तः। समीपैव जलपात्रमासीत् येन हस्तिपकः जलं पीतम् तथा तस्य कृते किंचित् स्थापितम्। किन्तु कुल्माषान् खादित्वा ऋषिणा साक्षात् वहिर्गमनं प्रारभत। ततः तेन पृष्टं महोदय! जलं पीत्वा गच्छतु। तदा उषस्तिचाक्रायणेनोक्तं किंचित्प्राण आगतोऽत उच्छिष्टजलं न पीबाम्यहम्। उच्छिष्टकुल्माषः तु खादितः उच्छिष्टजलं कथं नेति पृष्टे सति आह-

नास्वदेतेऽप्युच्छिष्टा इति। न वा अजीविष्यमिमानखादन्निति होवाच।
कामो मे उदपानमिति।[20]

यदि उच्छिष्टं न खाद्येत्तु साक्षात् म्रियेदतः खादितम्। परमधुना मयि प्राण आगतः यस्मादुच्छिष्टजलं न पातव्यम्। उच्छिष्टकुल्माषस्य खादनमिदं आपद्धर्मः कथ्यते। आपद्धर्मः कदापि नियमितधर्मः न भवतीति। उच्छिष्टभोजनस्य विषये मनुस्मृतौ मनुनोक्तम्-

नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथान्तरा।[21]

ब्रह्मचारी अन्यस्मै उच्छिष्टं खादितुं मा दद्यात्तथा स्वयमपि अन्यस्य उच्छिष्टभोजनं न अश्नुयात्। वस्तुतः आज्ञेयं सर्वेभ्यः वर्तते। महर्षिदयानन्दमतमपि एवं वर्तते। अस्माकं न्याय-व्यवस्थायामपि प्राप्यते यत् कश्चित् स्वप्राणरक्षणाय अन्यं हन्ति तु तस्मै दण्डः न देयः स्वल्पं वा देयम्। एतदतिरिक्तम् आचार्यमनुना विवाहप्रकरणे भणितम्-

उत्कृष्टायाभिरूपाय वराय सदृशाय च।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्यथाविधि॥[22]

अर्थात् सुन्दरश्रेष्ठरूपवान् वरः प्राप्यते तु अविवाहयोग्यापि कन्या विधिपूर्वकं पाणिग्रहणयोग्या भवति। वरोऽयं मातृपितृसम्बन्धि भवतु नाम। यतो ह्युक्तम् हि-

असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥[23]

अर्थात् कन्या परिणेतृमातुः षट्गोत्रपर्यन्तं पितुः गोत्रसम्बन्धिनी च मा स्यात्। एतस्मात् ज्ञायते दूरसम्बन्धः प्रशंसनीयः। किन्तु आपातकाले वर-वधूप्रापनं दुष्प्राप्यं जायते चेत् नियमोल्लंघनं मान्यमिति मनुमतम्। अन्यत्र मन्वाचार्यः आह-

काममामरणातिष्ठेद् गृहे कन्यर्तुमत्यपि।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित्॥[24]

अर्थात् कन्या प्रत्यूत विवाहयोग्या भवतु उत आमरणं गृहमेव तिष्ठेत् परन्तु असौ गुणहीनपुरुषाय न दातव्या। कन्यायाः मातृपित्रोः गृहे वसनं सम्यक् नास्ति तथापि मनुना योग्यवरस्य अप्राप्तनस्थितौ कुपुरुषेण सह विवाहात् श्रेयस्करं मन्यते। ब्रह्मचर्याश्रमे यदि शिष्यः सम्यक्योग्यगुरुं (ब्राह्मणं) न प्राप्नोति चेदब्राह्मणादेव विद्याग्रहणं कुर्यात्-

अब्राह्मणादध्ययनमापत्काले विधीयते ...॥[25]

महाभारतस्य पात्रेष्वेक एकलव्य आसीत् यः हिरण्यधनुनामकस्य निषादस्य पुत्र आसीत्। गुरुद्रोणाचार्यस्य तिरस्कृतात्परमसौ स्वयमेव अभ्यासेन धनुर्विद्यार्जनं कृतम्। भगवद्बुद्धस्यापि गुरुर्नासीत् यस्मात् स्पष्टयते आपात्काले गुरुर्न प्राप्यते चेत् स्वयं हि लक्ष्यं प्राप्तव्यम्। महाभारतस्य आश्वमेधिकपर्वणि द्विनवतितमेऽध्याये वैष्णवधर्मपर्वणि युधिष्ठिरप्रश्ने भगवान् कृष्णः आह राजन्! देशेऽकालः राष्ट्रोपरि च आपत्तिरापतति, जन्ममृत्युसूतकयोः आतपे वा मार्गगमने बाधारायाति तथा दूरं मार्गगमनम् अपेक्षते चेत् ब्राह्मणक्षत्रियवैश्यानामभावे शूद्रत अपि जीवननिर्वाहणार्थं किमपि अन्नं ग्रहीतुं शक्यते। आतुरदुःखितार्तबुभुक्षितर्वा ब्राह्मणः यदि विधिविधानं विना भोजनम् अश्नुयात्तथापि तस्य कृते प्रायश्चित्तं नावश्यकम्-

आतुरो दुःखितो वापि तथार्तो वा बुभुक्षितः।
भुञ्जन्नविधिना विप्रः प्रायश्चित्तायते न च॥[26]

**निष्कर्षः**

मानवजीवने सर्वेषु पुरुषार्थेषु सर्वाधिकमहत्वपूर्णः धर्मः। एतदर्थमेव भगवान्मनुः
कथयति सर्वदा कथमपि प्रकारेण धर्मरहितौ अर्थकामौ सर्वथा त्याज्यौ-

परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ॥[27]

सामान्यतया मानवस्वभावोऽयं यत्सर्वे स्वोन्नतिं इहलौकिक-पारलौकिकसुखं अधस्तादूर्ध्वगमनं चेहन्ते। कपिलमुनिवाक्यं प्रमाणमत्र-

धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण॥[28]

एवं मनुष्यस्य अभिलषितोन्नतेः मुख्यं साधनं धर्मः तथैतस्य विपरीतमधोगतेः साधनं अधर्मश्च वर्तते। अनेन जनानाम् अभ्युदय-निःश्रेयसोः उभयोरुन्नतिर्जायते। धर्मस्य पालनेन धरेयं स्वच्छन्दतया जनानां कल्याणं विदधाति।

उपर्युक्तविवेचनेन ज्ञायते यदापद्धर्मस्य ज्ञानम् अद्यत्वे सामान्यजनमानसेषु बह्वावश्यकं यतो हि संकटकाले केवलमेतस्यैव प्रयोगः विधीयते। जीवनेऽस्माकं विपत्तिकाले सर्वे त्रस्ताः ग्रस्ताश्च दृश्यन्ते सर्वे विपत्तौ किंकर्तव्यविमूढाश्च भवन्ति। यस्मात् विपत्तिसंकटं दूरीकर्तुम् आपद्धर्मस्य अवगमनम् तथा तस्य सुष्ठु प्रयोगज्ञानम् आवश्यकम्। एवमेव समाजे वाक्यमेकं प्रचलत् यत्- अहिंसा परमो धर्मः धर्मः हिंसा तथैव च। अर्थात् अहिंसा तु सामन्यधर्मः सर्वजनैः कर्तव्यमेव परन्तु धर्मस्य कृते हिंसापि विधीयते चेत्तदपि धर्म एव। अद्यत्वे प्रद्यौगिकीकाले धर्मानुसारम् आचरणं तु सदैव विधेयमेव परं ततः काले काले आपद्धर्मस्य पालनमपि बह्वावश्यकमिति प्रतिभाति।।

**सन्दर्भ**


1. मनुस्मृतिः २/६
2. महाभारतम् कर्णपर्व ६९/५८
3. पूर्वमीमांसासूत्रम् १/१/२
4. मनुस्मृतिः ८/१७
5. महाभारतम्, स्वर्गारोहणपर्व ५/६३
6. श्रीमद्भगवद्गीता ३/३५
7. महाभारतम अनुशासनपर्व १४१/६५
8. मनुस्मृतिः ६/९२
9. श्रीमद्भागवद्गीता १८/४६
10. महाभारतम् उद्योगपर्व ३७/७
11. याज्ञवल्क्यस्मृतिः ३/३५
12. मनुस्मृतिः १०/८२
13. याज्ञवल्क्यस्मृतिः ३/३९, ४१
14. याज्ञवल्क्यस्मृतिः ३/४२
15. मनुस्मृतिः ११/१६
16. मनुस्मृतिः १०/११८; याज्ञवल्क्यस्मृतिः ३/४४
17. महाभारतम् शान्तिपर्व १३१/४
18. महाभारतम् शान्तिपर्व १३१/१०
19. छान्दोग्योपनिषद् १/१०/२
20. छान्दोग्योपनिषद् १/१०/३
21. मनुस्मृतिः २/५६
22. मनुस्मृतिः ९/८८
23. मनुस्मृतिः ३/५
24. मनुस्मृतिः ९/८९
25. मनुस्मृतिः २/२४१
26. महाभारतम् आश्वमेधिकपर्व ९२वां अध्याय पृष्ठ २१८९
27. मनुस्मृतिः ४/१७६
28. सांख्यकारिका कारिका ४४
29. *महाभारतम्*, रामनारायणदत्तः (अनुवादक), गीताप्रेस-गोरखपुरः, १९६५

30. *याज्ञवल्क्यस्मृतिः (अपरार्कटीकासहिता)* आनन्दाश्रम-मूद्रणालयः, पूणे १९०४
31. *संस्कृत साहित्य का इतिहास,* उमाशङ्करः, चौखम्बा भारती अकादमी, वाणारसी २०१४
32. *मनुस्मृतिः (मन्वर्थमुक्तावली-व्याख्योपेता)* गिरिधरः (अनुवादक) चौखम्बा-संस्कृत-प्रतिष्ठानम्, देहली २०२०
33. *मनुस्मृतिः (मेधातिथिभाष्यसहिता),* एशियाटिक्सोसाइटि आफ बङ्गाल, कलिकत्ता १९३९
34. *याज्ञवल्क्यस्मृतिः,* कमलनयन (व्याख्याकार), जगदीश संस्कृत पुस्तकालय, जयपुर संस्करण २०१८
35. छान्दोग्योपनिषद्, सी. कुन्हन (सम्पादक) दी अद्यर लाईब्रेरी एन्ड रीसर्च सेन्टर मद्रास, संस्करण १९९६
36. छान्दोग्योपनिषद्, *एक दार्शनिक एवं सांस्कृतिक अध्ययन, मनुदेव, आस्था प्रकाशन, दिल्ली संस्करण २०१५*
37. *श्रीमद्भागवद्गीता,* कृष्णदास अकादमी वाराणसी, संस्करण १९८५
38. *पुरुषार्थ चतुष्टय,* प्रेमवल्लभ त्रिपाठी, चौखम्बा सुरभारती प्रकाशन वाराणसी, संस्करण ११००
39. *धर्मशास्त्र का इतिहास,* पी. वी. काणे, अर्जुनचौबे (अनुवादक), हिन्दी समिति सूचना विभाग, उत्तरप्रदेश १९९२
40. *भारतीय संस्कृतिः,* दीपककुमार, चौखम्बा सुरभारती प्रकाशन वाराणसी, संस्करणं २०१४
41. https://hi.m.wikipedia.org/wiki/%E0%A4%A4%E0%A4%B0%E0%A4%BE%E0%A4%87%E0%A4%A8_%E0%A4%95%E0%A4%BE_%E0%A4%AF%E0%A5%81%E0%A4%A6%E0%A5%8D%E0%A4%A7
42. https://hi.m.wikipedia.org/wiki/%E0%A4%86%E0%A4%AA%E0%A4%A6%E0%A5%8D%E0%A4%A7%E0%A4%B0%E0%A5%8D%E0%A4%AE